# Shri Jambunatha Ashtakam 2

# શ્રીજમ્બુનાથાષ્ટકમ્ ૨

## Document Information

Text title : jambunAthAShTakam 2

File name : jambunAthAShTakam.itx

Category : shiva, aShTaka

Location : doc_shiva

Transliterated by : Brahmashri Balaji Dvivedi

Proofread by : Balaji Dvivedi

Description/comments : From Tamil text Gajaaranya Maahaatmyam

Latest update : April 17, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 17, 2026

*sanskritdocuments.org*

# શ્રીજમ્બુનાથાષ્ટકમ્ ૨

પરાશર ઉવાચ ।
સહ્યાત્મજાપરિવહજ્જલમજ્જનાય
સર્વેશ્વરાય સરસીરુહલોચનાય ।
કૈલાસભાસુરકરીન્દ્રવનાલયાય
શ્રીજમ્બુમૂલનિલયાય નમશ્શિવાય ॥ ૧॥

ગૌરીકરાત્તવિધિપુષ્કરિણીપવિત્ર
પાનીયપૂરકબળીકૃતવિગ્રહાય ।
દૂરીકૃતાશ્રિતજનામયકલ્મષાય
શ્રીજમ્બુમૂલનિલયાય નમશ્શિવાય ॥ ૨॥

બ્રહ્મેન્દ્રજમ્બુમુનિરામશિવાગ્ન્યગસ્ત્ય
સૂર્યેન્દુમુખ્યસુરતાપસપૂજિતાય ।
કૈવલ્યદાય કરિણઃ કમલાર્ચિતાય
શ્રીજમ્બુમૂલનિલયાય નમશ્શિવાય ॥ ૩॥

શોણાક્ષચોળકૃતગોપુરસૌધસાલ
સન્મણ્ડપોજ્જ્વલગજેન્દ્રવનસ્થિતાય ।
ઊર્ણાયુતન્તુમયમન્દિરવાસિનેપ્રાક્
શ્રીજમ્બુમૂલનિલયાય નમશ્શિવાય ॥ ૪॥

ચોળાઙ્ગનાગળપરિચ્યુતસિન્ધુનીત
મુક્તાવિભૂષણભૃતે હ્યમૃતેશ્વરાય ।
શ્રેયસ્કરાય નવતીર્થગવાક્ષરન્ધ્રૈ
શ્શ્રીજમ્બુમૂલનિલયાય નમશ્શિવાય ॥ ૫॥

સ્નાનેષુગવ્યદળમૃદ્વ્રણદેયદૂર્વા
સઙ્ખ્યામ્પ્રકાશ્યનિજસવ્યગવાક્ષરન્ધ્રૈઃ ।
તન્મણ્ડલગ્ચભુવનાવનદીક્ષિતાય

શ્રીજમ્બુમૂલનિલયાય નમશ્શિવાય ॥ ૬॥

ઇન્દ્રસ્યવૃત્રવધદોષમપોહ્ય તસ્મૈ
સ્વારાજ્યદાય નિજપાદસમર્ચકાય ।
ભક્તાર્તિભઞ્જનકૃતે પરમેશ્વરાય
શ્રીજમ્બુમૂલનિલયાય નમશ્શિવાય ॥ ૭॥

શ્રુત્યન્તવેદ્યમહસે કિટિહંસરૂપ
ગોવિન્દપદ્મભવમૃગ્યપદાબ્જમૂર્ધ્ને ।
ભૂયોઽખિલાણ્ડરમણીસતતાર્ચિતાય
શ્રીજમ્બુમૂલનિલયાય નમશ્શિવાય ॥ ૮॥

જમ્બૂનાથ પ્રસીદ પ્રમથવરદયા મેયકારુણ્યમૂર્તે
કામારે કામવૈરિન્ કબલિતગરળા શેષલોકૈકનાથ ।
વેધો દેવેન્દ્ર જમ્બૂમુનિ રઘુતિલકો માઙ્ગ્યગસ્ત્યેન્દુલૂતા
માતઙ્ગાર્કાભિપૂજ્ય પ્રશમય દુરિતં ભો નમસ્તે નમસ્તે ॥ ૯॥

ઇતિ શ્રીજમ્બુનાથાષ્ટકં સમ્પૂર્ણમ્ ।

Encoded from Tamil and proofread by Brahmashri Balaji Dvivedi

*Shri Jambunatha Ashtakam 2*
pdf was typeset on April 17, 2026

Please send corrections to *sanskrit@cheerful.com*